DDE/I/SANS/I/12

# M.A. Part - I Examination 2012

## Sanskrit

## Paper - I

**Full Marks - 100** **Time : 4 hours**

**Write the answers to questions of each half in separate books.**

**First Half (Marks - 60)**

**Unit - I**

1. अधोलिखित मन्त्रेषु ऋषिच्छन्दो देवतानिर्देश– पूर्वकं सायणदिशा संस्कृत भाषया द्वयोः व्याख्या कार्या— 8×2=16

a) अग्निना रयिमश्नवत् पोषमेव दिवेदिवे।
यशसं वीरवत्तमम्।।

b) वायो तव प्रपृञ्चती धेना जिगाति दाशुषे।
उरूची सोमपीतये।।

c) कवी नो मित्रावरूणा तुविजाता उरूक्षया।
दक्षं दधाते अपसम्।।

d) दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः।
आ यातं रूद्रवर्तनी।।

e) महो अर्णः सरस्वती प्रचेतयति केतुना।
धियो विश्वा विराजति।।

2. अधोनिर्दिष्टेषु भाष्यपंक्तिषु कयोश्चित् द्रयोः व्याख्या कार्या—4×2=8

a) अग्निमीले हति सुक्तं प्रातरनुवाके आग्नेये कृतौ विनियुक्तम्।

b) आधाने तृतीयेष्टौ प्रथमाज्यभागस्यानुवाक्या।

c) मित्रं हुथे इति मैत्रावरुणस्तृचो गवामयने आरम्भणीये चतुर्विंशेऽहनि प्रातः सवने मैत्रावरुणस्य स्तोत्रियः।

d) सारस्वते तृचे या प्रथमा सा अन्वारम्भणीये ... सरस्वत्याः पुरोतुवाक्या।

अथवा

निम्नलिखितेषु मन्त्रेषु द्वयोः भावार्थः संस्कृत भाषया विलिख्यताम्।

a) ब्राह्मणोऽस्य मुखमासीद्बाहु राजन्यः कृतः।
ऊरु तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥

b) न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किंचनास॥

c) यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु।
यस्मान्न ऋते किंचन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु॥

d) असंबाधं मध्यतो मानवाना यस्या उद्वतः प्रवतः समंबहु।
नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतांनः॥

3. शिवसङ्कल्पसुक्तानुसारं मनसः स्वरूपं प्रतिपाद्यताम्। 8

अथवा

सरस्वतीदेवतायाः चारित्रिकवैशिट्यं सम्यगालोच्यताम्।

4. अधोलिखितेषु पदेषु द्वयोः व्याकरणदिशा साधनप्रक्रिया प्रदश्यताम्— 4×2

रत्नधातमम्, वक्षति, दाशुषे, अर्हाविदः

अथवा

प्रथम प्रश्नान्तर्गतस्य कस्यचिदेकस्य मन्त्रस्य पदपाठं प्रदर्श्य यथेच्छं द्वयोः पदयोः सूत्रोल्लेखपूर्वकं स्वराः साध्यन्ताम्। 4+(2×2)

## Unit - II

5. a) के तावत् पञ्चमहायज्ञाः? तेषां नामकरणे किं तात्पर्यम्? तत्र ब्रह्मयज्ञस्वरूपं सम्यगालोच्यताम्। 10

अथवा

b) ऐतरेयब्राह्मणोक्तं शुनः शेपोपाख्यानं संक्षेपे विलिख्य अत्र ''चरैवेति'' इत्यशंसस्य का अन्तर्निहिता भावना? इति विशदीक्रियताम्।

6. a) कठोपनिषदि वर्णितं नचिकेतसः तृतीयवरस्वरुपं– विशदीक्रियताम्। 10

अथवा

b) अधोलिखितेषु द्वयोः व्याख्या कार्या—

i) न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे–
वित्तमद्राक्ष्म चेत् त्वा।
जीविष्यामो यावदीशिष्यसि त्वं वरस्तु-
मे वरणीयः स एव॥

ii) अविद्यायामन्तरे वर्तमानाः स्वयं धीरा पण्डितम्मन्यमानाः
दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना–
यथान्धाः॥

iii) आसीनो इरं व्रजति शयानी याति सर्वतः।
कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति॥

## Second Half
## (Marks - 40)

1. अधोलिखित निरुक्तपंक्तिषु कयोशिचत् द्वयोः यास्कानुसारं व्याख्या कार्या–

8×2=16

a) समाम्नायः समाम्नातः। स व्याख्यातव्यः।

b) पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचतीति।

c) व्याप्तिमत्वान्तु शब्दस्य। अणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यावहारार्थं लोके।

d) अविद्यमाने सामान्येऽपि अक्षरवर्णसामान्यात् निर्ब्रूयात्।

अथवा

निपातस्वरूपं विलिख्य तस्य भेदान् सोदाहरणं प्रस्तूयताम्।

2. निम्नाङ्कितेषु पदेषु त्रयाणां व्युत्पत्तिः 3×3
यास्कानुसारतः प्रदेया-
आचार्यः, वीरः, वृत्रः, अश्वः, आदित्यः, नदी।

3. वेदः पौरुषेयः अपौरुषेयो वा इति सायणाचार्यदिशा पूर्वोतरपक्षाभ्यां सयुक्तिकं प्रतिपाद्यतांम्। 15

अथवा

''अभ्यर्हितं पूर्वम्'' इति न्यायेन ऋग्वेदस्यैव व्याख्यानमादौ युक्तम् तथापि यजुर्वेदस्य व्याख्यानमादौ कथं कृतम् इति सायणाचार्य-दिशा सप्रमाणं प्रस्तूयताम्।

—0—